.. The Ashokavadana ..

## ॥ अशोकवन ॥

पांशुप्रदानावदानं
यो असौ स्वमांसतनुभिर् यजनानि कृत्वा
अतप्यच्चिरं करुणाय जगतो हिताय ।
तस्य श्रमस्य सफलीकरणाय सन्तः
साऽवर्जितं शृणुत सांप्रतभाष्यमाणं ॥
एवं मया श्रुतं एकस्मिन् समये भगवान्
श्रावस्त्यां विहरति ।
इति सूत्रं वक्तव्यं ।
अत्र तावद्स्
भगवत्तथागतवदनाम्भोधरविवरप्रत्युद्गत
वचनसरत्सलिलधारासम्पातापनीतरागद्वेष
मोहमदमानमायाशाठ्यपङ्कपटलानां
शब्दन्यायाऽदितर्कशास्त्रार्थावलोकनौत्पन्न
प्रज्ञाप्रदीपप्रोत्सारितकुशास्त्रदर्शनान्ध
काराणां
संसारतृष्णाछेदिप्रवरसद्धर्मपयःपान
शौण्डानां गुरूणां संनिधौ
सर्वाववादकश्रेष्ठं
(शक्रब्रह्मईशानयमवरुणकुवेरवासवसोम
आदित्याऽदिभिर्स्
आ,शक्रब्रह्मईशानयमवरुणकुवेरवसवसोम
आदित्याऽदिभिर् ) अप्यप्रतिहतशासनं
कन्दर्पदर्पापमर्दनशूरं महाऽऽत्मानं
अतिमहर्द्धिकं स्थविरौपगुप्तं आरभ्य काञ्चिद्स्
एव विबुधजनमनःप्रसादकरीं धर्म्यां
कथां समनुस्मरिष्यामः ।
तत्र तावद्गुरुभिर् अवहितश्रोत्रैर् भवितव्यं ।
उपगुप्तौपाख्यानं
एवं अनुश्रूयते ।
यदा भगवान् परिनिर्वाणकालसमये
अपलालनागं विनीय कुम्भकारीं चण्डालीं
गोपालीं च तेषां मथुरां अनुप्राप्तः ।

तत्र भगवान् आयुष्मन्तं आनन्दं आमन्त्रयते स्म ।
अस्यां आनन्द मथुरायां मम
वर्षशतपरिनिर्वृतस्य गुप्तो नाम गान्धिको
भविष्यति ।
तस्य पुत्रो भविष्यति उपगौप्तनाम अलक्षणको
बुद्धो यो मम वर्षशतपरिनिर्वृतस्य
बुद्धकार्यं करिष्यति ।
तस्य अववादेन बहवो भिक्षवः
सर्वक्लेशप्रहाणादर्हत्त्वं साक्षात् करिष्यन्ति
।
ते अष्टादशहस्तां आयामेन द्वादशहस्तां
विस्तरेण चतुरङ्गुलमात्राभिः शलाकाभिश्च
गुहां पूरयिष्यन्ति ।
एषो अग्रो मे आनन्द श्रावकाणां भविष्यति
अववादकानां यदुत उपगुप्तो भिक्षुः ।
पश्यसि त्वं आनन्द दूरतए एव
नीलनीलाम्बरराजिं ।
एवं भदन्त ।
एष आनन्द उरुमुण्डो नाम पर्वतः ।
अत्र वर्षशतपरिनिर्वृतस्य तथागतस्य
शाणकवासी नाम भिक्षुर् भविष्यति ।
सो अत्र उरुमुण्डपर्वते विहारं
प्रतिष्ठापयिष्यति ।
उपगुप्तं च प्रव्राजयिष्यति ।
मथुरायां आनन्द नटो भटश्च द्वौ भ्रातरौ
श्रेष्ठिणौ भविष्यतः ।
तौ उरुमुण्डपर्वते विहारं प्रतिष्ठापयिष्यतः
।
तस्य नटभटिका इति संज्ञा भविष्यति ।
एतदग्रं मे आनन्द भविष्यति
शमथानुकूलानां शय्याऽसनानां यदिदं
नटभटिकारण्याऽयतनं ।
अथ आयुश्मान् आनन्दो भगवन्तं इदं अवोचत् ।
आश्चर्यं भदन्त यदीदृशं आयुष्मान् उपगुप्तो
बहुजनहितं करिष्यति ।
भगवान् आह ।

न आनन्द एतर्हि यथा अतीते अप्यध्वनि तेन विनिपतितशरीरेण अप्यत्र एव बहुजनहितं कृतं ।
उरुमुण्डपर्वते त्रयः पार्श्वाः ।
एकत्र प्रदेशे पञ्च प्रत्येकबुद्धशतानि प्रतिवसन्ति ।
द्वितीये पञ्चर्षिशतानि ।
तृतीये पञ्चमर्कटशतानि ।
तत्र यो असौ पञ्चानां मर्कटशतानां यूथपतिः स तं यूथं अपहाय यत्र पार्श्वे पञ्च प्रत्येकबुद्धशतानि प्रतिवसन्ति तत्र गतः ।
तस्य तान् प्रत्येकबुद्धान् दृष्ट्वा प्रसादो जातः ।
स तेषां प्रत्येकबुद्धानां शीर्णपर्णानि मूलफलानि च उपनामयति यदा च ते पर्यङ्केण उपविष्टा भवन्ति स वृद्धान्ते प्रणामं कृत्वा यावन् नवान्तं
गत्वा पर्यङ्केण उपविशति ।
यावत् ते प्रत्येकबुद्धाः परिनिर्वृताः ।
स तेषां शीर्णपर्णानि मूलफलानि च उपनामयति ।
ते न प्रतिगृह्णन्ति ।
स तेषां चीवरकर्णिकानि आकर्षयति ।
पादौ गृह्णाति ।
यावत् स मर्कटश्चिन्तयति ।
नियतं एते कालगता भविष्यन्ति ।
ततः स मर्कटः शोचित्वा परिदेवित्वा च द्वितीयं पार्श्वं गतो यत्र पञ्चर्षिशतानि प्रतिवसन्ति ।
ते च ऋषयः केचित् कण्टकापाश्रयाः केचिद्स् भस्मापाश्रयाः केचिदूर्ध्वहस्ताः केचित् पञ्चाऽतपावस्थिताः ।
स तेषां तेषां ईर्यापथान् विकोपयितुं आरब्धः ।
ये कण्टकापाश्रयास्तेषां कण्टकान् उद्धरति ।
भस्मापाश्रयाणां भस्म विधुनोति ।
ऊर्ध्वहस्तानां अधो हस्तं पातयति ।
पञ्चाऽतपावस्थितानां अग्निं अवकिरति ।
यदा च तैर् ईर्यापथो विकोपितो भवति तदा स

तेषां अग्रतः पर्यङ्कं बध्नाति ।
यावत् तैर् ऋषिभिर् आचार्याय निवेदितं ।
तेन अपि च उक्तं ।
पर्यङ्केण तावन् निषीदत ।
यावत् तानि पञ्चर्षिशतानि पर्यङ्केण उपविष्टानि ।
ते अनाचार्यका अनुपदेशकाः सप्तत्रिंशद्स् बोधिपक्षान् धर्मान् आमुखीकृत्य प्रत्येकां बोधिं साक्षात् कृतवन्तः ।
अथ तेषां प्रत्येकबुद्धानां एतदभवद्।
यत् किञ्चिदस्माभिः श्रेयो अवाप्तं तत् सर्वं इमं मर्कटं आगम्य ।
तैर् यावत् स मर्कटः फलमूलैः परिपालितः ।
कालगतस्य च तच्छरीरं गन्धकाष्ठैर्स् ध्मापितं ।
तत् किं मन्यसे आनन्द यो असौ पञ्चानां मर्कटशतानां यूथपतिः स एष उपगुप्तः ।
तदा अपि तेन विनिपतितशरीरेण अप्यत्र एव उरुमुण्डपर्वते बहुजनहितं कृतं ।
अनागते अप्यध्वनि वर्षशतपरिनिर्वृतस्य मम अत्र एव उरुमुण्डपर्वते बहुजनहितं करिष्यति ।
तच्च यथा एवं तथा उपदर्शयिष्यामः ।
शाणकवास्य्स्उपाख्यानं
यदा स्थविरेण शाणकवासिना उरुमुण्डे पर्वते विहारः प्रतिष्ठापितः समन्वाहरति ।
किं असौ गान्धिक उत्पन्नः ।
अथ अद्य अपि न उत्पद्यतए इति ।
पश्यत्युत्पन्नः ।
स यावत् समन्वाहरति ।
यो असौ तस्य पुत्र उपगुप्तो नाम्ना अलक्षणको बुद्धो निर्दिष्टो यो मम वर्षशतपरिनिर्वृतस्य बुद्धकार्यं करिष्यति इति किं असावुत्पन्नः ।
अथ अद्य अपि न उत्पद्यतए इति ।
पश्यत्यद्य अपि न उत्पद्यते ।
तेन यावदुपायेन गुप्तो गान्धिको भगवच्छासने

अभिप्रसादितः ।
स यदा अभिप्रसन्नस्तदा स्थविरः संबहुलैर्स्
भिक्षुभिः सार्धं एकदिवसं तस्य गृहं
प्रविष्टः ।
अपरस्मिन्नहनि आत्मद्वितीयः ।
अन्यस्मिन्नहनि एकाकी ।
यावद्गुप्तो गान्धिकः स्थविरं शाणकवासिनं
एकाकिनं दृष्ट्वा कथयति ।
न खल्वार्यस्य कश्चित् पश्चाच्छ्रमणः ।
स्थविर उवाच ।
जराधर्माणां कुतो अस्माकं पश्चाच्छ्रमणो
भवति ।

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org